श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री कृष्णचतुर्विंशतिस्तोत्रम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री कृष्णचतुर्विंशतिस्तोत्रम् ॥

केशवं केशिमथनं वासुकेर्भोगशायिनम्।
रासक्रीडाविलासाढ्यं कृष्णं वन्दे जगद्गुरुम्॥ 1 ॥

नारायणं नरहरिं नारदादिभिरर्चितम्।
तारकं भवबन्धानां कृष्णं वन्दे जगद्गुरुम्॥ 2 ॥

माधवं मधुरावासं भूधरोद्धारकं विभुम्।
आधारं सर्वभूतानां कृष्णं वन्दे जगद्गुरुम्॥ 3 ॥

गोविन्दमिन्दुवदनं श्रीवन्द्यचरणाम्बुजम्।
नवेन्दीवरसङ्काशं कृष्णं वन्दे जगद्गुरुम्॥ 4 ॥

विष्णुमुष्णीषभूषाढ्यं जिष्णुं दानवमर्दनम्।
तृष्णाभयप्रभेत्तारं कृष्णं वन्दे जगद्गुरुम्॥ 5 ॥

मधुसूदनं विधिनुतं बुधमानसवासितम्।
दधिचोरं महाभागं कृष्णं वन्दे जगद्गुरुम्॥ 6 ॥

त्रिविक्रमं त्रिलोकेशं भवदादिविजैर्नुतम्।
कविं पुराणपुरुषं कृष्णं वन्दे जगद्गुरुम्॥ 7 ॥

वामनं श्रीमदाकारं कामितार्थफलप्रदम्।
रामानुजं सामलोलं कृष्णं वन्दे जगद्गुरुम्॥ 8 ॥

श्रीधरं श्रीधरानुतं राधेयाद्यैर्नुतं हरिम्।
राधाविडम्बनासक्तं कृष्णं वन्दे जगद्गुरुम्॥ 9 ॥

हृषीकेशं विषावासं भिषजं भवरोगिणाम्।
तुषाराद्रिसुतावन्द्यं कृष्णं वन्दे जगद्गुरुम्॥ **10** ॥

पद्मनाभं पद्मनेत्रं पद्माहृत्पद्म बभ्भरम्।
आध्मातमुरलीलोलं कृष्णं वन्दे जगद्गुरुम्॥ **11** ॥

दामोदरं श्यामलाङ्गं सोमसूर्यविलोचनम्।
चामीकराम्बरधरं कृष्णं वन्दे जगद्गुरुम्॥ **12** ॥

सङ्कर्षणं वेङ्कटेशं ओङ्काराकारमव्ययम्।
शङ्खचक्रगदापाणिं कृष्णं वन्दे जगद्गुरुम्॥ **13** ॥

वासुदेवं व्यासनुतं भासुराभरणोज्ज्वलम्।
दासपोषणसंसक्तं कृष्णं वन्दे जगद्गुरुम्॥ **14** ॥

प्रद्युम्नमाम्नायमयं खद्योतनमयार्चितम्।
वैद्यनाथं प्रपञ्चास्यं कृष्णं वन्दे जगद्गुरुम्॥ **15** ॥

अनिरुद्धं ध्रुवनुतं शुद्धसङ्कल्पमव्ययम्।
शुद्धब्रह्मानन्दरूपं कृष्णं वन्दे जगद्गुरुम्॥ **16** ॥

नरोत्तमं पुराणेशं मुरदानववैरिणम्।
करुणावरुणावासं कृष्णं वन्दे जगद्गुरुम्॥ **17** ॥

अधोक्षजं सुधालापं बुधमानसवासिनम्।
अधिकानुग्रहं रक्षं कृष्णं वन्दे जगद्गुरुम्॥ **18** ॥

नारसिंह दारुणास्यं क्षीराम्बुधिनिकेतनम्।
वीराग्रेसरमानन्दं कृष्णं वन्दे जगद्गुरुम्॥ **19** ॥

अच्युतं कच्छपाकारमुज्ज्वलं कुण्डलोज्ज्वलम्।
सच्चिदानन्दवीर्याढ्यं कृष्णं वन्दे जगद्गुरुम्॥ 20॥

जनार्दनं घनाकारं सनातनतमं विभुम्।
विनायकपतिं नाथं कृष्णं वन्दे जगद्गुरुम्॥ 21॥

उपेन्द्रमिन्द्रावरजं कवीन्द्रनुतविग्रहम्।
कविं पुराणपुरुषं कृष्णं वन्दे जगद्गुरुम्॥ 22॥

हरिं सुरासुरनुतं दुरालोकं दुरीक्षणम्।
परेशं मुरसंहारं कृष्णं वन्दे जगद्गुरुम्॥ 23॥

श्रीकृष्णं गोकुलावासं साकेतपुरवासिनम्।
आकाशकालदिग्रूपं कृष्णं वन्दे जगद्गुरुम्॥ 24॥

कृष्णस्तोत्रं चतुर्विंशमेतत् सन्नामगर्भितम्।
यः पठेत् प्रातरुत्थाय सर्वपापैः प्रमुच्यते॥ 25॥

कृष्णाय वासुदेवाय हरये परमात्मने।
प्रणतक्लेशनाशाय गोविन्दाय नमो नमः॥ 26॥

॥ इति श्री कृष्णचतुर्विंशतिस्तोत्रं समाप्तम्॥